-यं, भिन्नजातीयः -या -यं.

DISSIMILARITY, DISSIMILITUDE, *s.* असादृश्यं, असदृशता, असाम्यं, असमता, असमानता, अतुल्यता, वैषम्यं, भेदः, विभेदः, भिन्नता, विभिन्नता, अन्तरं, परत्वं, अन्यथात्वं, विजातीयत्वं.

DISSIMULATION, *s.* अपह्नवः, निह्नवः, निह्नुतिः *f.*, छलकरणं, छद्म *n.* (न्), गोपनं, गुप्तिः *f.*, आकारगुप्तिः *f.*, अवहित्था -त्थं, कापट्यं, अपलापः, कृत्रिमता, प्रतारणा, दम्भः.

To DISSIPATE, *v. a.* (Scatter) कॄ (c. 6. किरति, करितुं -रीतुं), विकॄ, प्रकॄ, विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), व्यस् (c. 4. -अस्यति -असितुं), विद्रु in caus. (-द्रावयति -यितुं), विनिर्धू (c. 5. -धूनोति -धवितुं). *See* DISPERSE. (Spend) व्यय् (c. 1. व्ययति c. 10. व्यययति -यितुं), अपचि (c. 5. -चिनोति -चेतुं).

DISSIPATED, *p. p.* कीर्णः -र्णा -र्णं, विक्षिप्तः -प्ता -प्तं, बहुधागतः -ता -तं, विनिर्धूतः -ता -तं, सुव्यस्तः -स्ता -स्तं, विगलितः -ता -तं. *See* DISPERSED. (Licentious) कामवृत्तः -त्ता -त्तं, दुराचारः -रा -रं, व्यसनी -निनी -नि (न्).

DISSIPATION, *s.* विक्षेपः, विकिरणं. *See* DISPERSION. (Prodigality) धनव्ययः, अपव्ययः, धनोत्सर्गः, मोक्षणं.—(Licentiousness) स्त्रीसम्भोगनृत्यगीतादिसेवनं, व्यसनिता.

To DISSOCIATE, *v. a.* वियुज् (c. 7. -युनक्ति -योक्तुं), विप्रयुज्, विसंयुज्, विश्लिष् (c. 10. -श्लेषयति -यितुं), पृथक्कृ, असंलग्नं -ग्नां -ग्नं कृ.

DISSOLVABLE, DISSOLUBLE. *a.* द्राव्यः -व्या -व्यं, विद्राव्यः -व्या -व्यं, विलयनीयः -या -यं, द्रवणीयः -या -यं, गलनीयः -या -यं, क्षरभावः -वा -वं, क्षरणीयः -या -यं, याव्यः -व्या -व्यं, आर्द्रः -र्द्रा -र्द्रं, लीनः -ना -नं, विलयनशीलः -ला -लं.

To DISSOLVE, *v. a.* (Melt) विली in caus. (-लाययति -लापयति -यितुं), विद्रु in caus. (-द्रावयति -यितुं), द्रवीकृ, आर्द्रीकृ.—(Disunite) वियुज् (c. 7. -युनक्ति -योक्तुं).—(Dissolve friendship, &c.) सौहृद्यं भिद् (c. 7. भिनत्ति, भेत्तुं) or भञ्ज् (c. 7. भनक्ति, भंक्तुं); 'dissolve a league,' संहतिभेदनं कृ; 'dissolve an assembly,' सभां विसृज् (c. 6. -सृजति -स्रष्टुं), सभाभङ्गं कृ.

To DISSOLVE, *v. n.* विली (c. 4. -लीयते -लेतुं), प्रविली, प्रली, द्रु (c. 1. द्रवति, द्रोतुं), विद्रु, गल् (c. 1. गलति -लितुं), विगल्, क्षर् (c. 1. क्षरति -रितुं), द्रवीभू, आर्द्रीभू.

DISSOLVED. *p. p.* विद्रुतः -ता -तं, द्रुतः -ता -तं, विलीनः -ना -नं, लीनः -ना -नं, परिगलितः -ता -तं, द्रवीभूतः -ता -तं, असंहतः -ता -तं.

DISSOLVENT, *a.* द्रावकरः -री -रं, विलयनः -नी -नं, विद्रावकः -का -कं.

DISSOLUTE, *a.* व्यसनी -निनी -नि (न्), अनवस्थः -स्था -स्थं, व्यभिचारी -रिणी -रि (न्), तारलः -ली -लं, तरलः -ला -लं, दुराचारः -रा -रं, कामासक्तः -क्ता -क्तं, भोगासक्तः -क्ता -क्तं, दुष्टः -ष्टा -ष्टं, विषयी -यिणी -यि (न्), अवशः -शा -शं, कामुकः -का -कं, लम्पटः.

DISSOLUTELY, *adv.* लम्पटवत्, दुष्टवत्, कामुकवत्, भोगासक्तत्वात्.

DISSOLUTENESS, *s.* लम्पटता, लाम्पट्यं, व्यसनिता, अनवस्थितिः *f.*, अनवस्थता, इन्द्रियासंयमः, दुर्वृत्तता, विषयासक्तिः *f.*, भोगासक्तिः *f.*, स्त्रीसेवा, व्यभिचारः.

DISSOLUTION, *s.* (Liquefaction) विलयः -यनं, विद्रावः, द्रावः, द्रवीकरणं.—(Destruction) प्रलयः, नाशः, विनाशः, क्षयः, परिक्षयः, ध्वंसः.—(Dissolution of an assembly) सभाभङ्गः, सभाविरामः, सभानिवृत्तिः *f.*—(Dissolution of partnership) संसर्गभेदः, संसर्गवियोगः, संसर्गित्वनिवृत्तिः *f.*

DISSONANCE, *s.* (Discord) विस्वरता -त्वं, अपरवः.—(Disagreement) विसंवादः.

DISSONANT, *a.* विस्वरः -रा -रं, विकृतस्वरः -रा -रं, कर्कशस्वनः -ना -नं.—(Disagreeing) परस्परविरुद्धः -द्धा -द्धं, विसङ्गतः -ता -तं.

To DISSUADE, *v. a.* मैवं कार्षीर् इति उपदिश्य निवृत् in caus. (-वर्त्तयति -यितुं), भयहेतुं दर्शयित्वा निवृत् in caus. or विरम् in caus. (-रमयति -यितुं) or निवृ in caus. (-वारयति -यितुं), मैवं कृथा इति उपदिश् (c. 6. -दिशति -देष्टुं) or प्रत्यादिश्, विपरीतम् उपदिश्, विपरीतमन्त्रणं कृ, अन्तःख्या (c. 2. -ख्याति -तुं).

DISSUADER, *s.* निवर्त्तयिता *m.* (तृ) मैवं कार्षीर् इति उपदेशकः, प्रत्यादेष्टा *m.* (ष्टृ), विपरीतमन्त्रणदाता *m.* (तृ), निषेधकर्त्ता *m.*, (र्तृ).

DISSUASION, *s.* निवर्त्तनं, प्रत्यादेशपूर्व्वं निवर्त्तनं, मैवं कार्षीर् इति प्रत्यादेशः, निषेधार्थः परामर्शः, विपरीतमन्त्रणं, उद्यमभङ्गार्थः प्रबोधः.

DISSUASIVE, *a.* निवर्त्तकः -का -कं, निवर्त्तनशीलः -ला -लं, निवृत्तिकारी -रिणी -रि (न्), निषेधार्थकः -का -कं, प्रत्यादेशकः -का -कं, भयहेतुप्रदर्शकः -का -कं, विपरीतमन्त्रणकारी -रिणी -रि (न्).

DISSUASIVE, *s.* निवृत्तिकारणं, निवृत्तिहेतुः *m.*, निवर्त्तनहेतुः *m.*

DISSYLLABIC, *a.* द्व्यक्षरः -रा -रं, अक्षरद्वयविशिष्टः -ष्टा -ष्टं.

DISSYLLABLE, *s.* द्व्यक्षरं, अक्षरद्वयविशिष्टः शब्दः, द्व्यक्षरः शब्दः.

DISTAFF, *s.* तर्कुः *f.*, तर्कुटं -टी, सूत्रतर्कुटी, सूत्रला.

To DISTAIN, *v. a.* मलिन (nom. मलिनयति -यितुं), दुष् (c. 10. दूषयति -यितुं).

DISTANCE. *s.* (Interval, space) अन्तरं, अभ्यन्तरं, अन्तरालः -लं, मार्गं, व्यवधानं, व्यवायः,—(Remoteness) दूरता, असान्निध्यं, असन्निधानं, असन्निकर्षः; 'a little distance,' कियद्दूरं, ईषद्दूरं, नातिदूरे; 'at a distance,' दूरं, दूरे, दूरतस्, विदूरतस्.—(Haughtiness) दुर्धर्षता, दुराधर्षत्वं, अनालापः.

To DISTANCE, *v. a.* दूरीकृ, दव (nom. दवयति -यितुं), अपसृ in caus. (-सारयति -यितुं), दूरतः कृ.

DISTANCED, *p. p.* दूरीकृतः -ता -तं, अपसारितः -ता -तं.

DISTANT, *a.* (Remote) दूरः -रा -रं, विदूरः -रा -रं, दूरस्थः -स्था -स्थं, दूरस्थितः -ता -तं, दूरस्थायी -यिनी -यि (न्), अनुपस्थायी, अनुपस्थः -स्था -स्थं, दूरीभूतः -ता -तं, दूरवर्त्ती -र्त्तिनी -र्त्ति (न्), विप्रकृष्टः -ष्टा -ष्टं, असन्निकृष्टः -ष्टा -ष्टं, दविष्ठः -ष्ठा -ष्ठं, दवीयान् -यसी -यः (स्), असन्निहितः -ता -तं, माध्वः -ध्वा -ध्वं.—(Haughty) दुर्धर्षः -र्षा -र्षं, दुराधर्षः -र्षा -र्षं, अनालापी -पिनी -पि (न्).

DISTASTE, *s.* (Aversion of the palate, disrelish) अरुचिः *f.*, अनभिरुचिः *f.*, विरसत्वं, वितृष्णा, उत्क्लेशः.—(Dislike) विरक्तिः *f.*, वैराग्यं, वैरक्त्यं, अरुचिः *f.*, अननुरागः, अप्रीतिः *f.*, द्वेषः, विद्वेषः, अनिच्छा, घृणा, पराङ्मुखता.

To DISTASTE, *v. a.* and *n.* (Dislike) न रुच् (c. 1. रोचते -चितुं) with dat.; as, "he distastes that,' तत् तस्मै न रोचते; न अभिनन्द् (c. 1. -नन्दति -न्दितुं), अरुचिं कृ.

DISTASTEFUL, *a.* अरुचिरः -रा -रं, अरुच्यः -च्या -च्यं, अप्रियः -या -यं, अरसः -सा -सं, विरसः -सा -सं, अरुचिजनकः -का -कं, अप्रीतिकरः -री -रं, विस्वादः -दा -दं, अस्वादुः -दुः -दु.

DISTEMPER, *s.* (Disease) रोगः, व्याधिः *m.*, आमयः, पीडा, अस्वास्थ्यं, असुस्थता, विकारः.—(Uneasiness) व्यथा, क्लेशः, दुःखं, कष्टं, आर्त्तिः *f.*, उपतापः, तापः, अनिर्वृतिः *f.*—(Bad condition) दुष्प्रकृतिः *f.* दुःस्थितिः *f.*, असद्भावः, कुभावः, दुर्दशा, दुरवस्था.

To DISTEMPER, *v. a.* पीड् (c. 10. पीडयति -यितुं), व्यथ् (c. 10. व्यथयति -यितुं), क्लिश् (c. 9. क्लिश्नाति, क्लेशितुं), उपहन् (c. 2. -हन्ति -न्तुं), उपतप् in caus. (-तापयति -यितुं), बाध् (c. 1. बाधते -धितुं).

DISTEMPERATURE, *s.* वायुवैलक्षण्यं, वायुगुरुता, आकाशवैलक्षण्यं, गुरुतापः.

DISTEMPERED, *p. p.* व्याधितः -ता -तं, रोगी -गिणी -गि (न्), अस्वस्थः -स्था -स्थं, आर्त्तः -र्त्ता -र्त्तं, आतुरः -रा -रं, पीडितः -ता -तं, उपहतः -ता